दिनांक 5-6-21

शास्त्री तृतीय खण्ड विषय - व्याकरण
ग्रन्थ - न्याय सिद्धान्त मुक्तावली (अनुमानखण्डम्)

प्रश्न- अनुमिति स्वरूपं लक्षणं वा सयुक्तिकं लेख्याः

उत्तर- द्विविधादपि परामर्शात् पक्षः साध्यवान् इत्येवमाकारानुमितिः स्वीकार्या यदा व्याप्यप्रकारकपक्षविशेष्यकपरामर्शादनुमितिर्जाता तदा पक्षप्रकारकव्याप्यविशेष्यकः परामर्शो नास्ति यदा च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शादनुमितिर्जाता तदा व्याप्यप्रकारकपक्षविशेष्यकः परामर्शो नास्तीति कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसत्त्वात् कस्यापि परामर्शस्य कारणत्वं न स्यात् अतः पक्षो व्याप्यवान् इत्याकारकपक्षविशेष्यकपरामर्शात् पक्षविशेष्यिका पक्षः साध्यवान्? इत्याकारिका पक्षे व्याप्य इति व्याप्यविशेष्यकपरामर्शात् साध्यविशेष्यिका पक्षे साध्यम् इत्याकारिकाऽनुमितिः स्वीक्रियते। एवं च एकधर्मावच्छिन्नकार्यं प्रति यदा नैकधर्मावच्छिन्नस्य कारणता तदा व्यतिरेकव्यभिचारः प्रकृते च साध्यप्रकारकपक्षविशेष्यकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शत्वावच्छिन्नस्य, पक्षप्रकारकसाध्यविशेष्यकानुमितित्वावच्छिन्नं प्रति च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शत्वावच्छिन्नस्य कारणतया एकधर्मावच्छिन्नकार्यं प्रति अनेकधर्मावच्छिन्नस्य कारणस्याभावान्न व्यतिरेकव्यभिचारः।

एतदुक्तं भवति - वह्निव्याप्यधूमवान् पर्वतः इति परामर्शात् पर्वतो वह्निमान् इत्याकारानुमितिः पर्वते वह्निव्याप्यो धूमः इति परामर्शात् पर्वते वह्निः इत्याकारानुमितिर्जायते।

ननु परामर्शस्य व्याप्यप्रकारकपक्षविशेष्यकपक्षप्रकारकव्याप्यविशेष्यकान्यतरपरामर्शत्वेन पक्षः साध्यवानित्याकारानुमितिं प्रति कारणता स्वीकार्या, अन्यतरपरामर्शत्वावच्छिन्नकारणस्य सत्त्वान्न व्यतिरेकव्यभिचारः कारणतावच्छेदकावच्छिन्नप्रतियोगिताककारणाभावे कार्यतावच्छेदकावच्छिन्नकार्योत्पादस्यैव व्यतिरेकव्यभिचाररूपत्वात् इति चेन्न - तद्भिन्नत्वे सति तद्भेदवान् यः तत्प्रतियोगिभेदवत्त्वम्। यथा घटभिन्नत्वे सति घटभेदवद् एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वमेतद्द्वय इति इदमेव <u>पक्षविशेष्यक</u> द्वयपदान्यतरत्वं नाम।

एवं पक्षविशेष्यक परामर्श भिन्नत्वे सति व्याप्य विशेष्यक परामर्शभिन्नं एतद् द्वयातिरिक्तं ज्ञानमात्रं तद् भिन्नत्वं द्विविध परामर्श इति इदमेव पक्षविशेष्यक व्याप्य विशेष्यक परामर्शान्यतरत्वमिति एवं चान्यतरत्व रूपकारणतावच्छेदक उक्तौ ज्ञानात् प्रवेशेन विशेष्यविशेषणभाव व्यत्यासेन व्याप्य विशेष्यक परामर्श भिन्नत्वे सति पक्षविशेष्यक परामर्शभिन्नोयः तद्भिन्नत्व रूपस्य पक्षविशेष्यक परामर्श भिन्नत्वे सति व्याप्यविशेष्यक परामर्शभिन्नोयः तत् प्रतियोगिक भेदवत्व रूपस्य च अन्यतरत्वस्य विनिगमनाविरहेण कारणतावच्छेदकत्वेन च गौरवेणान्यतरत्वेन कारणतायाः स्वीकर्तुमयोग्यत्वात् इति ।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰ वि॰
सुलसेना प्राणीया

दिनाङ्क ‑ ‑21 उपशास्त्री द्वितीय वर्ष - विषय - व्याकरण
ग्रन्थ - सिद्धान्तकौमुदी, तुदादि प्रकरणम्

1 गिलति - गिरति — गॄ धातोर्लट् लटः स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे, तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायां, शप्प्रबाधके तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्धलोपे। ऋत इद्धातोः इति सूत्रेण ऋकारस्य स्थाने इकारे रपरत्वे गिरति इति स्थिते अचि विभाषा इति सूत्रेण रकारस्य स्थाने लकारादेशे विकल्पेन गिलति इति सिद्धम्, लत्वाभावे गिरति इति रूपं भवति।

2 जगार - जगाल — गॄ धातोर्लिट् लिट् स्थाने तिप्तस्झि इति सूत्रेण तिप्प्रत्यये, परस्मैपदानां णल... इति सूत्रेण तिपः स्थाने णलादेशे, अनुबन्धलोपे। लिटि धातोरनभ्यासस्य इति द्वित्वे उरत्, पूर्वोऽभ्यासः इति अभ्याससंज्ञायां ह्रस्वः इति सूत्रेण ह्रस्वे उरत् रपरत्वे हलादिशेषे। कुहोश्चुः इति सूत्रेण गकारस्य स्थाने जकारे रपरत्वे जगार इति सिद्धम्। इति सूत्रेण ... णित्वात् वृद्धौ रपरे जगार इति सूत्रेण रकारस्य स्थाने लत्वे कृते विकल्पपक्षे अचि विभाषा इति सूत्रेण जगाल इति सिद्धम्।

3 - पृच्छति - प्रच्छ धातोर्लट्, लट् स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। सार्वधातुकसंज्ञायां शप्प्रबाधके तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्धलोपे। ग्रहिज्यावयिव्यधिवष्टि इति सूत्रेण सम्प्रसारणे पृच्छति इति सिद्धम्।

4 म्रियते - मृङ् धातोर्लट् लट् स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। सार्वधातुकसंज्ञायां शप्प्रबाधके तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्धलोपे। रिङ् शयग्लिङ्क्षु इति सूत्रेण ऋकारस्य स्थाने रिङादेशे अचि श्नुधातु इति सूत्रेण इयङादेशे कृते ङित्वात् टित आत्मनेपदानां टेरे इति एत्वे कृते म्रियते इति सिद्धम्।

अमरनाथ मिश्र
एसो. प्रो. व्याकरण
रा० उ० सं० म० वि०
रुद्रावल ना पूर्णिया